# 12. अनयोक्त्यः

## अभ्यासः

**प्रश्न 1. एकपदेन उत्तरं लिखत**
(क) कस्य शोभा एकेन राजहंसेन भवति?
(ख) सरसः तीरे के वसन्ति?
(ग) कः पिपासितः म्रियते?
(घ) के रसालमुकुलानि समाश्रयन्ते?
(ङ) अम्भोदाः कुत्र सन्ति?

**उत्तर:**
(क) सरोवरस्य/सरसः
(ख) बकाः
(ग) चातकः
(घ) भृङ्गाः
(ङ) गगने

**प्रश्न 2. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत**
(क) सरसः शोभा केन भवति?
(ख) चातक: किमर्थं मानी कथ्यते?
(ग) मीनः कदा दीनां गतिं प्राप्नोति?
(घ) कानि पूरयित्वा जलदः रिक्तः भवति?
(ङ) वृष्टिभिः वसुधां के आर्द्रयन्ति?

www.dreamtopper.in

**उत्तर:**
(क) सरसः शोभा राजहंसेन भवति।
(ख) पिपासितः चातकः, पुरन्तरं जलं याचते म्रियते वा। अतः चातक: मानी कथ्यते।
(ग) सरोवरस्य सङ्कोचम् अञ्चति मीनः दीनां गतिं प्राप्नोति।
(घ) नानानदीनदशतानि पूरयित्वा जलद: रिक्तः भवति।
(ङ) वृष्टिभिः वसुधां अम्भोदाः आर्द्रयन्ति।

**प्रश्न 3. अधोलिखितवाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत**
(क) मालाकारः तोयैः तरोः पुष्टिं करोति।
(ख) भृङ्गाः रसालमुकुलानि समाश्रयन्ते।
(ग) पतङ्गाः अम्बरपथम् आपेदिरे।

(घ) जलदः नानानदीनदशतानि पूरयित्वा रिक्तोऽस्ति।
(ङ) चातकः वने वसति।

**उत्तर:**
(क) मालाकारः कैः तरोः पुष्टिं करोति?
(ख) भृङ्गाः कानि समाश्रयन्ते?
(ग) के अम्बरपथम् आपेदिरे?
(घ) कः नानानदीनदशतानि पूरयित्वा रिक्तोऽस्ति?
(ङ) चातकः कुत्र वसति?

**प्रश्न 4. अधोलिखितयोः श्लोकयोः भावार्थं स्वीकृतभाषया लिखत**

**(अ) तोयैरल्पैरपि ..................... वारिदेन। भावार्थ:-धाराप्रवाहं जलं वर्षयता** .... (i). .. जलदेन वृक्षाः पादपाः च तादृशाः ...(ii)......... न भवन्ति। यथा ...........(iii)........... मालाकारेण दत्तं अल्पमपि जलं वृक्षान् पोषयति। इत्येवं आवश्यकतायां विपत्तौ वा अत्यल्पं ...........(iv)........... अपि महत्त्वपूर्ण वर्तते।

**उत्तर:**
(i) वर्षाकालिकेन
(ii) तृप्ताः/सन्तुष्टाः
(iii) ग्रीष्म?
(iv) सहायम्

**(आ) रे रे चातक ......................... दीनं वचः।**
भावार्थ:- मेघस्य जलबिन्दवैः एव तृप्तं ....... (i).......... कविः कथयति यत् ....... (ii)......... बहवः मेघाः सन्ति परम् सर्वे न वर्षन्ति। केचित् वृथा गर्जन्ति। जलपूर्णाः मेघाः एव वर्षित्वा ... (iii)......... आर्द्रयन्ति। अतः त्वम् यस्य कस्यापि अग्रे ..(iv)....... मा ब्रूहि।

**उत्तर:**
(i) चातकं
(ii) आकाशे
(iii) पृथ्वी
(iv) दीनवचनानि

**प्रश्न 5. अधोलिखितयोः श्लोकयोः अन्वयं लिखत**
(अ) आपेदिरे ......... कतमां गतिमभ्युपैति ।
(आ) आश्वास्य ............ सैव तवोत्तमा श्रीः॥

www.dreamtopper.in

**उत्तर:**
(अ) पतङ्गाः परितः अम्बरपथत् आपेदिरे, भृङ्गाः रसालमुकुलानि समाश्रयन्ते। सरः त्वयि सङ्कोचम् अञ्चति, हन्त दीनदीनः मीनः तु कतमां गतिम् अभ्युपैतुः।
(आ) तपनोष्णतप्तम् पर्वतकुलम् आश्वास्य उद्दामदावविधुराणि काननानि च नानानदीनदशतानि पूरयित्वा
च हे जलद! यत् रिक्तः असि तव सा एव उत्तमा श्रीः।

**प्रश्न 6. उदाहरणमनुसत्य सन्धिं/सन्धिविच्छेदं वा कुरुत**

| | | | | | | |
|---|---|---|---|---|---|---|
| (i) | यथा– | अन्य | + | उक्तय: | = | अन्योक्तय: |
| | (क) | ...................... | + | ...................... | = | निपीतान्यम्बूनि |
| | (ख) | ...................... | + | उपकार: | = | कृतोपकार: |
| | (ग) | तपन | + | ...................... | = | तपनोष्णतप्तम् |
| | (घ) | तव | + | उत्तमा | = | ...................... |
| | (ङ) | न | + | एतादृशा: | = | ...................... |
| (ii) | यथा– | पिपासित: | + | अपि | = | पिपासितोऽपि |
| | (क) | ...................... | + | ...................... | = | कोऽपि |
| | (ख) | ...................... | + | ...................... | = | रिक्तोऽसि |
| | (ग) | मीन: | + | अयम् | = | ...................... |
| | (घ) | सर्वे | + | अपि | = | ...................... |
| (iii) | यथा– | सरस: | + | भवेत् | = | सरसो भवेत् |
| | (क) | खग: | + | मानी | = | ...................... |
| | (ख) | ...................... | + | नु | = | मीनो नु |
| | (ग) | पिपासित: | + | वा | = | ...................... |
| | (घ) | ...................... | + | ...................... | = | पुरतो मा |
| (iv) | यथा– | मुनि: | + | अपि | = | मुनिरपि |
| | (क) | तोयै: | + | अल्पै: | = | ...................... |
| | (ख) | ...................... | + | अपि | = | अल्पैरपि |
| | (ग) | तरो: | + | अपि | = | ...................... |
| | (घ) | ...................... | + | आर्द्रयन्ति | = | वृष्टिभिरार्द्रयन्ति |

www.dreamtopper.in

**उत्तरः**

| | | | | | | |
|---|---|---|---|---|---|---|
| (i) | (क) | **निपीतानि** | + | **अम्बूनि** | = | निपीतान्यम्बूनि |
| | (ख) | **कृत** | + | उपकारः | = | कृतोपकारः |
| | (ग) | तपन | + | **उष्णतप्तम्** | = | तपनोष्णतप्तम् |
| | (घ) | तव | + | उत्तमा | = | **तवोत्तमा** |
| | (ङ) | न | + | एतादृशाः | = | **नैतादृशाः** |
| (ii) | (क) | **कः** | + | **अपि** | = | **कोऽपि** |
| | (ख) | **रिक्तः** | + | **असि** | = | रिक्तोऽसि |
| | (ग) | मीनः | + | अयम् | = | **मीनोऽयम्** |
| | (घ) | सर्वे | + | अपि | = | सर्वेऽपि |
| (iii) | (क) | खगः | + | मानी | = | **खगोमानी** |
| | (ख) | **मीनः** | + | नु | = | मीनो नु |
| | (ग) | पिपासितः | + | वा | = | **पिपासितो वा** |
| | (घ) | पुरतः | + | मा | = | पुरतो मा |
| (iv) | (क) | तोयैः | + | अल्पैः | = | **तोयैरपि** |
| | (ख) | **अल्पैः** | + | अपि | = | अल्पैरपि |
| | (ग) | तरोः | + | अपि | = | **तरोरपि** |
| | (घ) | **वृष्टिभिः** | + | आर्द्रयन्ति | = | वृष्टिभिरार्द्रयन्ति |

www.dreamtopper.in

**प्रश्न 7. उदाहरणमनुसृत्य अधोलिखितैः विग्रहपदैः समस्तपदानि रचयत**
विग्रहपदानि — समस्त पदानि
यथा- पीतं च तत् पङ्कजम् = पीतपङ्कजम्
(क) राजा च असौ हंसः = ...............
(ख) भीमः च असौ भानुः = ...............
(ग) अम्बरम् एव पन्थाः = ...............
(घ) उत्तमा च इयम् श्रीः = ...............
(ङ) सावधानं च तत् मनः, तेन = ...............

**उत्तरः**
(क) राजहंसः
(ख) भीमभानुः
(ग) अम्बरपंथाः

(घ) उत्तमश्री:
(ङ) सावधानमनसा

## योग्यताविस्तारः

### पाठपरिचयः

अन्येषां कृते या उक्तयः कथ्यन्ते ता उक्तयः अन्योक्तयः अत्र पाठे सटलिता वर्तन्ते। अस्मिन् पाठे षष्ठश्लोकम् सप्तमश्लोकम् च अतिरिच्य ये श्लोकाः सन्ति ते पण्डितराजजगन्नाथस्य 'भामिनीविलास' इति गीतिकाव्यात् सटलिताः सन्ति। षष्ठः श्लोक: महाकवि माघस्य 'शिशुपालवधम्' इति महाकाव्यात् गृहीतः अस्ति। सप्तमः श्लोक: महाकविभर्तृहरेः नीतिशतकात् उद्धृतः अस्ति।

### कविपरिचयः

पण्डितराजजगन्नाथः संस्कृतसाहित्यस्य मूर्धन्यः सरसश्च कविः आसीत्। सः शाहजहाँ नामकेन मुगलशासकेन स्वराजसभायां सम्मानितः। पण्डितराजजगन्नाथस्य त्रयोदश कृतयः प्राप्यन्ते।

1. गगलहरी
2. अमृतलहरी
3. सुधालहरी
4. लक्ष्मीलहरी
5. करुणालहरी
6. आसफविलासः
7. प्राणाभरणम्
8. जगदाभरणम्
9. यमुनावर्णनम्
10. रसगगधरः
11. भामिनीविलासः
12. मनोरमाकुचमर्दनम्
13. चित्रमीमांसाखण्डनम्।

www.dreamtopper.in

एतेषु ग्रन्थेषु 'भामिनीविलासः' इति तस्य विविध पद्यानां सङ्ग्रहः।

महाकविमाघः – महाकविमाधस्य एकमेव महाकाव्यं प्राप्यते "शिशुपालवधम्" इति।
भर्तृहरिः – महाकविभर्तृहरेः त्रीणि शतकानि सन्ति, नीतिशतकम्, शृङ्गारशतकम् वैराग्यशतकं च।
अधोदत्ताः विविधविषयकाः श्लोकाः अपि पठनीयाः स्मरणीयाश्च
हंसः- हंसः श्वेतः बकः श्वेतः को भेदो बकहंसयोः।
नीरक्षीरविभागे तु हंसो हंसः बको बकः।।

एकमेव पर्याप्तम्-एकेनापि सुपुत्रेण सिंही स्वपिति निर्भयम्।
सहैव दशभिः पुत्रैः भारं वहति रासभी ।।
पिकः – काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः।
वसन्तसमये प्राप्ते काकः काकः पिकः पिकः।।
चातक वर्णनम् – यद्यपि सन्ति बहूनि सरांसि,
स्वादुशीतलसुरभिपयांसि।
चातकपोतस्तदपि च तानि,
त्यक्त्वा याचति जलदजलानि।।

www.dreamtopper.in